# AJ-1437

## M.A. (Final) Term End Examination, 2021-22

### SANSKRIT (Paper-V)

### (गद्यकाव्य, नाट्यशास्त्र तथा सौंदर्यशास्त्र)

**Time : 3 hours]** **[Maximum Marks : 100**

**सूचना-** सर्वे प्रश्नाः समाधेयाः।

### इकाई-I

**1.** निम्नलिखितेषु कयोश्चिद् द्वयोः व्याख्या कार्योः- **20**

(क) देवः द्वारस्थिता सुरलोक मारोहतस्त्रिशङ्कोरिव कुपित शतमखहुङ्कार निपातिता राजलक्ष्मीर्दक्षिणापशादागता चण्डाल-कन्यका पञ्जरस्यं शुकमादाय देवं विज्ञापयति सकल भुवनतल सर्वरत्नानाम् उदधिरिवैकभाजनं देवः विहङ्गमश्चायमाश्चर्यभूतो निखिल भुवनतलरत्नमिति कृत्वा देवपालमूलमेनमादाया गताऽहमिच्छामि देवदर्शन सुखमनुभवितुम् इति ! एतदाकर्ण्य देवः प्रमाण मित्युक्त्वा विरराम।

(ख) अथ चलति महीपतावन्योन्यमतिरभस-सञ्चलन-चालिताङ्गद पत्रभङ्ग मकरकोटि पाटितानेकपानाम्, आक्षेपदोलायमान कण्ठदाम्नाम् अंसस्यलोल्लसित कुङ्कुमपटवास धूलिपटल पिंजरीकृत दिशाम् आलोल मालती कुसुम शेखरोत्पत दलि कदम्बकानाम्, अर्द्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमान गण्डस्थलानाम् गमन प्रणाम लालसानाम् अहमहमिकया वक्षः स्थल प्रेश्वोलित हारलतानाम्, उत्तिष्ठता मासीदति महान् सम्भ्रमो महीपतीनाम्।

(ग) एवञ्च क्रमेण निवर्लिताभिषेको विषधरनिर्मोक परिलघुनी धवले परिधाय धौत वाससि शरदम्बरैक देश इव जलक्षालननिर्मल तनुः अतधवल जलधरच्खेदशुचिना दुकूल पटपल्लवेन तुहिनगिरिरिव गगनसरित्स्त्रोतसा कृत शिरोवेष्टनः सम्पादित पितृजलक्रियो मन्त्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्।

(घ) अचिराञ्च प्रशान्ते तस्मिन् मृगयाकलकले निर्वृष्ट-मूक जलधर वृन्दानुकारिणी मथनावसानोपशान्तवारिणी सागर इव स्तिमिततामुपगते कानने, मन्दीभूत मयोहमुपजात कुतूहलः पितुरुत्सङ्गादिषदिव निष्क्रम्य कोटरस्य एव शिरोधरां प्रसार्थ्य सन्त्रात्सतरल तारकः शैशवात् किमिदमिति सञ्जात दिदृक्षः तमेव दिशं चक्षुः प्राहिणवम्।

### इकाई-II

**2.** गद्यं कविनां निकषं वदन्ति' इत्युक्तिः साधु विविच्यताम्। **20**

**अथवा**

कादम्बरीदृशा शबरसेनापतिः वर्णनं कुरुत।

### इकाई-III

**3.** निम्नलिखितेषु कयोरपि द्वयोः व्याख्या कार्याः- **20**

(क) अवस्थानुकृतिर्नाट्यम्, (ख) प्रवेशकः,

(ग) पञ्च अर्थप्रकृतयः, (घ) नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।

### इकाई-IV

**4.** अधोलिखितेषु द्वयोः व्याख्या विधेयाः - **20**

(क) नायकस्य सात्विक गुणाः (ख) धीर ललित नायकः

(ग) नाटकीय प्रवृत्तिः (घ) तद् व्यापारात्मिका वृत्तिश्चतुर्धा

### इकाई-V

**5.** अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्या कार्या :- **20**

(क) ईहामृगः (ख) प्रहसनम् (ग) प्रस्तावना (घ) प्रकरणम्